# Shri Shivakamasundaryamba Dandaka 08-14

# श्रीशिवकामसुन्दर्यम्बादण्डकः

## Document Information

Text title : Shri Shivakamasundaryamba Dandaka 08 14

File name : shivakAmasundaryambAdaNDakaH.itx

Category : devii, devI, daNDaka

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-14

Latest update : August 15, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2021

*sanskritdocuments.org*

# श्रीशिवकामसुन्दर्यम्बादण्डकः

जय जय शिवकामसुन्दर्युमे, देवि, रम्याकृते,
भक्तराजीहृदन्तःस्थिताज्ञान-
गाढान्धकारप्रभेदस्फुरद्बालसूर्यायमाणैर्नखैः भूषिते पादकान्त्या
निरस्तारुणाभाम्बुजे, जङ्घयाधःकृतानङ्गतूणीयुगे,
कन्तुजिन्मोहदोरूद्वयीशोभिते, दिव्यकौसुम्भपट्टाम्बरालङ्कृते,
नैकरत्नच्छदाभासुरोद्दामकाञ्चीलतामण्डिते,
नीलरोमावलीमेयमध्यानते, कोकयुग्मोल्लसद्वक्षजातोन्नते,
तारहारावलीराजिताभ्यन्तरे,
पार्विकस्वच्छशीतांशुबिम्बस्फुरद्वक्त्रशोभासरोमज्जदीशानहृज्जात-
सद्बुद्बुदौपम्यवन्नासिकामौक्तिकोद्भासिते,
नीलकञ्जातसौन्दर्यजिल्लोचनोद्यत्कटाक्षावलीरक्षिताशेषलोके,
महारत्नराजीलसच्चारुकोटीरभाराजिते, मञ्जुले,
कामजित्स्वान्तसम्मोहकान्यङ्गकान्यम्बको वा भृशं वर्णितुं
शक्नुयाद्वेदवाचां सुदूराणि दिव्यानि ते सच्चरित्राणि को वेद भूम्यामुमे ॥ १॥

भगवति,
निजपादसेवासमायातसप्तार्णवीसन्निभोदारगम्भीरतावन्महाशैव-
गङ्गाख्यतीर्थोत्तमप्रान्तसंरूढचाम्पेय-
गन्धाभिरामातिबालानिलाधूतचीनांशुकोन्नद्धकेतुस्फुरद्गोपुरालङ्कृते,
तारमङ्गापुरे तारकानायके
दक्षकोपाभिभूते पुरा कृत्तिकारोहिणीपूर्वतत्प्रेयसीभिः
स्वमाङ्गल्यसिद्ध्यै सदा सेविते, ब्रह्मणा वह्निना धर्मराजेन
रक्षोजलाधीशवातैस्तथा राजराजादिसर्वामराधीश्वरैर्नित्यमाराधिते,
वेदवाग्बोधिते, चारुकैलासनाथे हरे बद्धभावे शिवे ॥ २॥

अमृतजलधिमध्यभागोल्लसद्रत्नवर्योज्ज्वलद्वीपदेशे
मिलत्कल्पवाटीवृते चारुचिन्तामणीगेहमध्ये

महाचक्रराजस्फुरत्पीठिकायां सुरश्रेष्ठमुख्यामराधीशपादे,
सदा शम्भुमञ्चे महेशानकामेश्वरस्याङ्कमध्यस्थिते, देवि,
कामेश्वरीपूर्वसर्वामरीयूथनाथाभिराराद्दुदाराभिरामाभिधानाभिरारा-धिते,
अत्यन्तहृद्यं तमुद्यन्तमानन्दरूपं सदा शम्भुमम्ब त्वया साकमेवं
हृदा ये भजन्ते मुदा ते हि लोकेश्वराः ॥ ३॥

गिरिवरतनये सदा सम्पदं पुत्रपौत्राभिवृद्धिं च देहीति
याच्याक्रमः स्वर्गमोक्षप्रदायां त्वयि स्वल्पकस्तन्मया यत्स्तुतौ
यच्च पूजाविधौ ध्यानयोगे नमस्यासु यच्चापराद्धं शिवे क्षम्यतां
सर्वमेतत्वया सर्वलोकेश्वरि त्वं सदा पाहि मां तुभ्यमस्तु
प्रणामाञ्जलीनां शतम् ॥ ४॥

इति श्रीशिवकामसुन्दर्यम्बादण्डकः समाप्तः ।

Proofread by Rajesh Thyagarajan

*Shri Shivakamasundaryamba Dandaka 08-14*

pdf was typeset on August 15, 2021

Please send corrections to *sanskrit@cheerful.com*